# रामरक्षास्तोत्रम्

Exported from ambuda.org on 2025-12-23 05:02:30 UTC

viniyoga

अस्य श्रीरामरक्षास्तोत्रमन्त्रस्य बुधकौशिक ऋषिः श्रीसीतारामचन्द्रो देवता अनुष्टुप् छन्दः सीता शक्तिः श्रीमान् हनुमान् कीलकं श्रीरामचन्द्रप्रीत्यर्थे रामरक्षास्तोत्रजपे विनियोगः ।

dhyanam

ध्यायेदाजानुबाहुं धृतशरधनुषं वद्धपद्मासनस्थंपीतं वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रसन्नम्।
वामाङ्कारुढसीतामुखकमलमिलल्लोचनं नीरदाभंनानालंकारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥

1

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।एकैकमक्षरं पुंसां महापातकनाशनम् ॥ १॥

2

ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम् ।जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम् ॥ २ ॥ ॥

3

सासितूणधनुर्वाणपाणिं नक्तंचरान्तकम् ।स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् ॥ ३ ॥

4

रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम् ।शिरो मे राधवः पातु भालं दशरथात्मजः ॥ ४ ॥

5

कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती ।घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः ॥ ५ ॥

6

जिह्वां विद्यानिधिः पातु कण्ठं भरतवन्दितः ।स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः ॥ ६ ॥

7

करौ सीतापतिः पातु हृदयं जामदग्न्यजित् ।मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः ॥ ७ ॥

8

सुग्रीवेशः कटी पातु सक्थिनी हनुमत्प्रभुः ।ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत् ॥ ८॥

9

जानुनी सेतुकृत्पातु जङ्घे दशमुखान्तकः ।पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः ॥ ९ ॥

10

एतां रामबलोपेतां रक्षां यः सुकृती पठेत् ।सचिरायुः सुखी पुत्री विजयी विनयी भवेत् ॥१०॥

11

पातालभूतलव्योमचारिणश्छद्मचारिणःन द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ॥११॥

12

रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् ।नरो न लिप्यते पापैर्मुक्तिं च विन्दति ॥१२॥

13

जगज्जैत्रैकमन्त्रेण रामनाम्नाभिरक्षितम् ।यः कण्ठे धारयेत्तस्य करस्थाः सर्वसिद्धयः ॥१३॥

14

वज्रपञ्जरनामेदं यो रामकवचं स्मरेत् ।अव्याहताज्ञः सर्वत्र लभते जयमङ्गलम् ॥ १४॥

15

आदिष्टवान्यथा स्वप्ने रामरक्षामिमां हरः ।तथा लिखितवान्प्रातः प्रबुद्धो बुधकौशिकः ॥१५॥

16

आरामः कल्पवृक्षाणां विरामः सकलापदाम् ।अभिरामस्त्रिलोकानां रामः श्रीमान्स नः प्रभुः॥१६॥

17

तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ ।पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥१७॥

18

फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ ।पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥१८॥

19

शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम् ।रक्षःकुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ॥१९॥

20

आत्तसज्जधनुषाविषुस्पृशा- वक्षयाशुगनिषङ्गसङ्गिनौ ।रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छताम् ॥२०॥

21

संनद्धः कवची खड्गी चापबाणधरो युवा ।गच्छन्मनोरथान्नश्च रामः पातु सलक्ष्मणः ॥२१॥

22

रामो दाशरथिः शूरो लक्ष्मणानुचरो बली ।काकुत्स्थः पुरुषः पूर्णः कौसल्येयो रघूत्तमः ॥२२॥

23

वेदान्तवेद्यो यज्ञेशः पुराणपुरुषोत्तमः ।जानकीवल्लभः श्रीमानप्रमेयपराक्रमः ॥ २३ ॥

24

इत्येतानि जपन्नित्यं मद्भक्तः श्रद्धयान्वितः ।अश्वमेधाधिकं पुण्यं सम्प्राप्नोति न संशयः ॥२४॥

25

रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम् ।स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नराः ॥२५॥

26

रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरंकाकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम् ।राजेन्द्रं सत्यसंधं दशरथतनयं श्यामलं शान्तमूर्तिंवन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥२६ ॥

27

रामाय रामभद्राय रामचन्द्राय वेधसे ।रघुनाथाय नाथाय सीतायाः पतये नमः ॥ २७॥

28

श्रीराम राम रघुनन्दन राम रामश्रीराम राम भरताग्रज राम राम ।श्रीराम राम रणकर्कश राम रामश्रीराम राम शरणं भव राम राम ॥ २८॥

29

श्रीरामचन्द्रचरणौ मनसा स्मरामिश्री रामचन्द्रचरणौ वचसा गृणामि।श्रीरामचन्द्रचरणौ शिरसा नमामिश्रीरामचन्द्रचरणौ शरणं प्रपद्ये ॥ २९ ॥

30

माता रामो मत्पिता रामचन्द्रःस्वामी रामो मत्सखा रामचन्द्रः ।सर्वस्वं मे रामचन्द्रो दयालु-र्नान्यं जाने नैव जाने न जाने ॥३०॥

31

दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा ।पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम् ॥३१॥

32

लोकाभिरामं रणरङ्गधीरंराजीवनेत्रं रघुवंशनाथम् ।कारुण्यरूपं करुणाकरं तंश्रीरामचन्द्रं शरणं प्रपद्ये ॥३२॥

33

मनोजवं मारुततुल्यवेगंजितेन्द्रियं बुद्धिमतां वरिष्ठम् ।वातात्मजं वानरयूथमुख्यंश्रीरामदूतं शरणं प्रपद्ये ॥ ३३ ॥

34

कूजन्तं रामरामेति मधुरं मधुराक्षरम् ।आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ ३४॥

35

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥३५॥

36

भर्जनं भवबीजानामर्जनं सुखसम्पदाम् ।तर्जनं यमदूतानां रामरामेति गर्जनम् ॥३६॥

37

रामो राजमणिः सदा विजयते रामं रमेशं भजेरामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहंरामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥ ३७ ॥

38

राम रामेति रामेति रमे रामे मनोरमे।सहस्रनाम तत्तुल्यं रामनाम वरानने ॥३८॥